**अवशोष** पु० अव+शुष—भावे घञ्। अत्यन्तशोषे।

**अवश्य** त्रि० न वश्यः। अनायत्ते १अनधीने २दुर्दान्ते।

**अवश्यकरण** न० अवश्यं करणं योगविभागात् मलोपः। नियतकरणे अकरणान्निवृत्तौ "अवश्यकरणञ्चाकरणान्निवृत्तिः" प्रा०त० रघु०।

**अवश्यपुत्र** पु० अवश्यः पुत्रः। शासितुमशक्ये अवशीभूते पुत्रे। तस्य भावः मनोज्ञा०वुञ्। आवश्यपुत्रकम् तद्भावे न०।

**अवश्यम्** अव्य०अव+श्यै—डमु। १निश्चये २अशक्यनिवारणे च। "अवश्यं याति तिर्य्यक्त्वं जग्ध्वा चैवाहुतं हविः" मनुः "अवश्यम्भाविन्यर्थे वै सन्तापो नेह विद्यते" भा०शा०प०। 'लुम्पेदवश्यमः कृत्ये तुम्काममनसोरपि" इत्युक्तेः कृत्यान्ते मलोपः अवश्यपाच्यम्। "अवश्यभव्येष्वनवग्रहग्रहा" नैष०। अवश्यम् भवः ठञ् अव्ययस्य टिलोपः आवश्यकः। अवश्यम्भवे त्रि०। "एतेष्वावश्यकस्त्वसौ" भाषा०।

**अवश्या** स्त्री अव+श्यै—क। १कुज्झटिकायाम् २अनायत्तायां स्त्रियाञ्च।

**अवश्याय** पु० अव+श्यै—ण। १कुज्झटिकायाम्, "अवश्यायकणास्रावाश्चारुमुक्ताफलत्विषः" भट्टिः। २अभिमाने च। पृ० ह्रस्वः अवश्ययोऽपि कुज्झटिकायाम्।

**अवश्रयण** न० अव+श्रि—ल्युट्। चूल्लीतोऽवतार्य्य स्थापने। "अधिश्रयणावश्रयणान्तादिपूर्व्वापरीभूतः व्यापारकलापः पाकादिशब्दवाच्यः" सा०द०।

**अवष्टब्ध** त्रि० अव+स्तम्भ—क्त षत्वम्। १आसन्ने, २आक्रान्ते, ३अवलम्बिते, "अवष्टब्धा यष्टिः" सि०कौ० ४प्रतिरुद्धे च।

**अवष्टभ्य** अव्य० अव+स्तम्भ ल्यप् षत्वम्। अवलम्ब्येत्यर्थे।

**अवष्टम्भ** पु०अव+स्तम्भ—घञ् षत्वम्। १प्रारम्भे २अनम्रतायाम् ३आलम्बने। "अवष्टम्भकरं वापि भयघ्नं दण्डधारणम्"। सुश्रु० कर्म्मणि घञ्। ३स्तम्भे, "रघोरवष्टम्भमयेन पत्रिणा" रघुः "न पर्य्यङ्कावष्टम्भपादप्रसारणानि गुरुसन्निधौ कुर्य्यात्" सुश्रुतः ४सुवर्णे च भावे ल्युट्। अवष्टम्भनम्। प्रारम्भे आलम्बने च न०। [स्वान इत्येव।

**अवष्वाण** पु० अव+स्वन-घञ् षत्वम्। भोजने शब्दे अव-

**अवस्** अव्य० अवर+प्रथमायाः पञ्चम्याः सप्तम्या वाऽर्थे असि अवादेशः। १अवरशब्दार्थे २पश्चादर्थे च। अवोरमणीयम्, आगतः,वसति वा। अव—भावे असिच्। २रक्षणे न०। कर्म्मणि असिच्। २यशसि ३अन्ने ४धने च न०। "मित्रस्य चर्षणीधृतोऽवो देवस्य" य०११,६,२"अवोरक्षणं द्युम्नं यशोऽन्नं वा" वेददी०।गमने च "आवां रथोनियुत्वान् वक्षदवसे" ऋ०१,१३५,४, "अवसे रक्षणाय गमनाय वा" भा०।

**अवस** पु० अव+असच्। १नृपे २सूर्य्ये सि०कौ० ३अर्कवृक्षे ४पाथेयभेदे च 'एतत्ते रुद्रावसं तेन" य०२,६१ "अवसशब्देन देशान्तरं गच्छतो मार्गमध्ये तटागादिसमीपे भोक्तव्य ओदनविशेष उच्यते" वेददी०।

**अवसक्त** त्रि०अव+सन्ज—क्त। १संलग्ने। 'अनुजानुमध्यमवसक्तेति" किरा०। भावे क्त। २संसर्गे न०।

**अवसक्थिका** स्त्री अवबद्धे सक्थिनी यया कप्। १पर्य्यङ्कबन्धे "शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकाम्" मनुः "अहिना अवसक्थिकाबन्धहेतुभूतेन" किरा० १२,२२,टी० मल्लि०।

**अवसण्डीन** न०अव+सम्+डी—क्त। विहगाधःपतनरूपे गतिभेदे।

**अवसथ** पु० अव+सो—कथन्। १निलये, २ग्रामे च। अवस्यति शास्त्रमत्र अव+सो कथन्। ३छात्रनिलये मठे हेम०।

**अवसथ्य** पु० अवसथ+स्वार्थे यत्। अवसथशब्दार्थे।

**अवसन्न** त्रि०अव+सद—कर्त्तरि क्त। १विषादप्राप्ते २विनाशोन्मुखे "अवसन्नतापमतमिस्रमभात्" माघः। ३स्वकार्य्याक्षमे च

**अवसर** पु०अव+सृ—अच्। १प्रस्तावे, जिज्ञासानिवृत्तयेऽवश्यवक्तव्ये २सङ्गतिभेदे सङ्गतयश्च तच्छब्दे वक्ष्यन्ते ४वत्सरे, मन्त्रभेदे, ५वर्षणे, क्रियास्थितियोग्यतासम्पादकरूपे ६कालिकेऽवकाशे च। "शशंस सेवावसरं सुरेभ्यः" कुमा० "अन्योन्यदर्शनप्राप्तोविक्रमावसरं चिरात्" रघुः "अवसरमधिगम्य तं हरन्त्यः" माघः।

**अवसरालय** पु० अवसराय आलयो यत्र। अङ्गराले तत्र हि काले सर्व्वैः आलयएव स्थीयते इति तस्य तथात्वम्।

**अवसर्पिन्** त्रि०अव+सृप—णिनि। अधोगन्तरि स्त्रियां ङीप्।

**अवसर्ग** पु० अव+सृज-घञ्। १अप्रतिबन्धे यथेष्टं क्रियतामिति २कामचारानुज्ञायां "अस्त्ववसर्गः कामचारानुज्ञा" सि०कौ०। २स्वतन्त्रतायाञ्च। [चरे।

**अवसर्प** पु० अवसर्पति प्रभुनिदेशात् परम्। अव+सृप—अच्।

**अवसर्पिन्** त्रि० अव+सृप-णिनि। अधोगन्तरि स्त्रियां ङीप्। सा च वौद्धानां कल्पकाले हेम० सच दशकोटिकोटिसागरवर्षमितः।

**अवसाद** पु०अव+सद—घञ्। १नाशे, २विषादे,३स्वकार्य्याक्षमत्वरूपावसन्नतायाञ्च। "विपदेति तावदवसादकरी" किरा० "वैद्यासनावसादो वा रोगी वा स्यादधोमुखः" स्वरावसादो घुर्घुरक" इति च सुश्रुतः।

**अवसादक** त्रि० अवसादयति अव+सद—णिच्-ण्वुल्। १अवसन्नताकारके २खेदकारके। "एष शोकः परित्यक्तः